**SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529**
**(International Peer-Reviewed & Refereed Journal)**
**Vol. 1, Special Issue, (December) 2025**

# विवक्षावशात् कारकाणि भवन्ति

**Sangita Bhandari**
Research Scholar, Dept. of Sanskrit
Bankura University, Bankura, Purandarpur, West Bengal, India
Email: bhandari111sangita@gmail.com
**Supervisor: Dr. Soumen Goswami**
Associate Professor
Bankura Christian College, Bankura, West Bengal, India

Abstract: 'विवक्षावशात् कारकाणि भवन्ति' इति एकं प्रसिद्धं वचनम्। किन्तु वचनमिदं सूत्रत्वेन क्रमदीश्वर-विरचिते 'संक्षिप्तसारः' नामके व्याकरणे प्राप्यते। तत्र सूत्रस्यार्थः हि वक्तुः इच्छानुसारेण कारकाणां प्रयोगो भवति। अर्थात् यत्र येषां कारकाणां प्रसक्तिः अस्ति तद्व्यातिरिच्य तत्र वक्ता इच्छानुसारेण अन्येषां कारकाणां प्रयोक्तुं समर्थः भवति। अत्र विवक्षा इत्यनेन प्रसिद्धकवेः शिष्टजनानां वा इच्छा बोध्या।

Keywords: विवक्षा, कारकम्, विभक्तिः, कर्ता, कर्म, करणम्, सम्प्रदानम्, अपादानम्, अधिकरणम् ।

अष्टाध्यायाम् आचार्येन पाणिनिना कारकस्य आलोचनवेलायाम् आदौ अपादानकारकस्य आलोचनं क्रियते। ततः च क्रमेण सम्प्रदानम्, करणम्, अधिकरणम्, कर्मकारकस्य, कर्तृकारकस्य च सूत्राणाम् आलोचनं क्रियते। परन्तु सिद्धान्तकौमुदीकारेण भट्टौजिदीक्षितेन सुप्-विभक्तेः क्रमानुसारेण अर्थात् प्रथमाविभक्तिः आरभ्य सप्तमीविभक्तिं यावत् एवं रूपेण कर्तृकारकतः आरभ्य अधिकरणकारकं यावत् कारकविभक्तयोश्च आलोचनं विहितम्। संस्कृते सप्तविभक्तयः प्राप्यन्ते यथा, प्रथमा-द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमी चेति। परन्तु भाषातात्त्विकानां मते अष्टविभक्तयः प्राप्यन्ते, ते अतिरिक्ततया सम्वोधनविभक्तिं स्वीकुर्वन्ति। यद्यपि सम्वोधनस्य विभक्तिः प्रथमायाः तुल्यरूपेण वर्तते तर्हि सम्वोधनं पृथक्तया संस्कृतवैयाकरणैः न स्वीक्रियते।

कारकं किम्? इत्यस्य उत्तररूपेण प्राप्यते क्रियापदेन सह वाक्ये विविधस्य पदस्य मुख्यः गौणः वा सम्वन्धः वर्तते तत् कारकरूपेण ज्ञायते। अतः 'प्रौढमनोरमायाम्' भट्टोजिदीक्षितेन उक्तम्- "कारकम् इत्यस्य क्रियान्वयि इत्यर्थ इति"[1] अर्थात् 'क्रियान्वयि कारकम्' इति। वाक्ये क्रियापदेन सह विविधस्य पदस्य षड्विधाः सम्वन्धा प्राप्यन्ते। यथा, कर्तृसम्वन्धः, कर्मसम्वन्धः, करणसम्वन्धः, सम्प्रदानसम्वन्धः, अपादानसम्वन्धः, अधिकरणसम्वन्धश्चेति। एतेभ्यः षड्विधेभ्य सम्वन्धेभ्यः षड्कारकाणि भवन्ति। संस्कृतवाङ्मये षड्विधेषु कारकेषु षड्विभक्तयः निर्दिष्टाः भवन्ति। यथा— कर्तृकारके प्रथमाविभक्तिः[2], कर्मकारके द्वितीयाविभक्तिः[3], करणकारके तृतीयाविभक्तिः[4], सम्प्रदानकारके चतुर्थीविभक्तिः[5], अपादानकारके पञ्चमीविभक्तिः[6], अधिकरणकारके सप्तमीविभक्तिः[7] च इति।

यत्र यत् कारकं निर्दिष्टं भवति व्याकरणशास्त्रे तत्र तु विवक्षावशात् भवितुम् अर्हन्ति अन्यानि कारकाणि। तथाहि संक्षिप्तसारव्याकरणे क्रमदीश्वरेण उच्यते— "विवक्षावशात् कारकाणि भवन्ति" इति। अत्र विवक्षा इति पदस्य अर्थो हि प्रसिद्धकवेः पण्डितस्य वा इच्छा, इतरजनस्य इच्छायाः अत्र प्राधान्यं न वर्तते, यदि एवमपि वर्तते चेत् तर्हि कारकस्य नियमानां प्रयोजनं न स्यात्। करणकारके अधिकरणकारके च विवक्षितकर्तृत्वस्य उदाहरणरूपेण महाभाष्यकारेण पतञ्जलिना उक्तम्— "स्थाली पचतीति...अधिकरणस्य कर्तृत्वम्।....काष्ठानि पचन्तीति.....करणस्य कर्तृत्वम्"[8]। वाक्यपदीये भर्तृहरिणा अधिकरणस्य कर्तृत्वविवक्षां कथितम्—

"वस्तुत स्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पच्यते इत्येषा विवक्षा दृश्यते यतः"।। इति।

एतद्विषयं न केवलं करणस्य अधिकरणस्य च कर्तृत्वविवक्षा, कर्तृकर्मादिकारकेषु अपि च विवक्षाविशेषेण अन्यदपि कारकं भवेत्। अत्र तानि विवक्षितविशेषस्थानानि अधः प्रस्तूयन्ते—

**षड्विधेषु कारकेषु कर्तृत्वविवक्षायां प्रथमाविभक्तिः**

कर्तृवाच्ये कर्तृकारके कर्तरि भवति प्रथमाविभक्तिः। अतः कर्तृकर्मादिकारकं यदि अभिहितम् उक्तं वा स्यात् तर्हि तत्र भविष्यति प्रथमा विभक्तिः। स्वभावतः एव कर्तृवाच्ये कर्ता भवति अभिहितः उक्तः वा। यदि किमपि कारकम् अभिहितम् उक्तं वा स्यात् तर्हि तत्र प्रातिपदिकार्थे प्रथमा विभक्तिः भविष्यति। सामान्यरूपेण एताः विभक्तयः 'अभिहिते प्रथमा' इति नाम्ना अभिधीयते। अतः कर्तरि अर्थात् कर्तृकारके भविष्यति प्रथमा विभक्तिः— व्याकरणशास्त्रे इत्थं किमपि सूत्रं नास्ति। 'वालकः चन्द्रं पश्यत' इति उदाहरणे कर्तृवाच्ये वालकः इति पदं दृश-धातोः तिप्-प्रत्ययेन उक्तत्ववशात् 'वालकः' इति पदे अभिहिते कर्तरि प्रातिपदिकार्थे प्रथमा भवति। 'उक्त' इति पदस्य अर्थो भवति धातोः तिप्, तस्, झि चेत्यादि प्रत्ययैः सह केनचित् कर्ता कर्म् वा निर्दिष्टं स्यात्। कर्तरि कर्तृवाच्ये या प्रथमा सा तु भवति पाणिनिसम्मता 'प्रातिपदिकार्थे प्रथमा' इति। यथा— रामः गच्छति। पक्षे तु 'अनभिहिते'[9] इति सूत्रस्य अधिकारत्वात् कर्मादिकारके भवन्ति द्वितीयादिविभक्तयः। परन्तु कर्म-करण-सम्प्रदान-अपादान-अधिकरणान्यपि कारकानि अभिहितत्वात् विधीयते प्रथमा विभक्तिः। अभिहितकर्तारम् उक्तकर्ता इति कथ्यते। एवं च अनभिहितकर्तारम् अनुक्तकर्ता इत्युच्यते।

कर्तृवाच्ये कर्मणि कारके 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तिः भवति। अपि च कर्मवाच्ये कर्मणः उक्तत्वात् विधीयते प्रथमा विभक्तिः। यथा— शिशुना चन्द्रः दृश्यते। अत्र कर्म चन्द्रस्य उक्तत्वात् 'अभिहिते प्रातिपदिकार्थे कर्मणि प्रथमा' सञ्जाता। अत्र 'चन्द्र' इति पदे 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण कर्मत्वं विहितम्। 'शिशुः' च अत्र कर्ता अनुक्तत्वात् 'कर्तृकरणयोस्तृतीया' इति सूत्रेण विहिता तृतीया।

'कर्तृकरणयोस्तृतीया'[10] इति सूत्रेण करणकारके तृतीया विभक्तिः भवति। करणस्य तु कर्तृत्वविवक्षायां भवति प्रथमा विभक्तिः। यथा— परित्राणाय साधुनामसिश्छिनत्ति दुष्कृतम्। अत्र असि हि करणम्। अस्य उक्तत्वात् अत्र असि पदे प्रातिपदिकार्थे प्रथमा विभक्तिः विहितः भवति। असि इति पदे 'साधकतमं करणम्'[11] इति सूत्रेण करणत्वम् विहितम्।

सम्प्रदानकारके 'चतुर्थी सम्प्रदाने' इति सूत्रेण सामान्यतया भवति चतुर्थी विभक्तिः। अर्थात् अनुक्तसम्प्रदाने चतुर्थी विभक्तिः भवति। परन्तु सम्प्रदानस्य अभिहितत्वात् तत्र प्रातिपदिकार्थे प्रथमा विभक्तिः भवति। यथा— 'दानीयः स द्विजः सर्वैयस्यास्ति हृदयं महत्'। अत्र द्विजः हि सम्प्रदानम्, अस्य अभिहितत्वात् अभिहिते सम्प्रदाने प्रथमा स्यात्। अत्र द्विज-पदस्य सम्प्रदानत्वं 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति सूत्रेण वर्तते।

'अपादाने पञ्चमी'[12] इति सूत्रेण अपादानकारके पञ्चमी विभक्तिः भवति। किन्तु अपादानस्य उक्तत्वात् तत्र प्रथमा विभक्तिः भवति। यथा— 'दुर्जनो नैव भेतव्यो भये स्यात्तस्य साहसम्' इति उदाहरणे दुर्जनः हि अपादानम्। अत्र अस्य अभिहितत्वात् अपादाने प्रथमा विभक्तिः विहिता। दुर्जनः इति पदे 'भीत्रार्थानां भयहेतुः'[13] इति सूत्रेण अपादानत्वं विहितम्।

अधिकरणकारके 'सप्तम्यधिकरणे च'[14] इति सूत्रेण सप्तमी विभक्तिः भवति। परन्तु अधिकरणस्य

अविवक्षत्वात् कर्तृत्वविवक्षायां विधीयते प्रथमा विभक्तिः। यथा— स्थाली पचति। अत्र उक्ते अधिकरणे प्रथमा विभक्तिः भवति। स्थाली इत्यत्र 'आधारोऽधिकरणम्' इति सूत्रेण आधारत्वम् विहितम्।

**करणादिकारकेषु कर्मत्वविवक्षायां द्वितीया विभक्तिः**

कर्तृकारके कर्तरि वा कर्मत्वविवक्षायाः दृष्टान्तः न प्राप्यते। 'कर्मणि द्वितीया' इति सूत्रेण कर्मणि कर्मकारके वा द्वितीया विभक्तिः भवति। यथा— छात्रः व्याकरणशास्त्रं पठति। उदाहरणेऽस्मिन् व्याकरणशास्त्रम् इति पदे 'कर्तुरीप्सिततं कर्म' इति सूत्रेण कर्मत्वं भवति। तत्परं 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तिः भवति। एवं कर्मत्वविवक्षा अपि करणादिकारके—

करणस्य कर्मत्वविवक्षायामपि द्वितीया विभक्तिः भवति, अत्र 'कर्तृकरणयोस्तृतीया' इति सूत्रेण तृतीया विभक्तिः भवति। यथा— (अक्षैः) अक्षान् दिव्यति इति। अस्मिन् उदाहरणे 'दिवः कर्म च' इति सूत्रेण दिव्-धातोः करणकारकं विकल्पेन कर्मसंज्ञां प्राप्नोति। ततः 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तिः भवति। करणेऽपि कर्मत्वम् उल्लिखितम् 'अकथितञ्च' इति सूत्रेण अर्थात् करणस्य अविवक्षत्ववशात् कर्मत्वं स्यात्। यथा— पाचकः तण्डुलान् (तण्डुलैः— करणम्) ओदनं पचति। अस्मिन् उदहरणे पाचकः तण्डुलान् (तण्डुलात्) ओदनं पचति- इत्थम् अपादानस्य अपि कर्मत्वं भवितुं शक्यते।

यदि सम्प्रदानस्य कर्मत्वविवक्षा भवति तर्हि 'कर्मणि द्वितीया' इति सूत्रेण तत्र द्वितीया विभक्तिः भवति। तदा तु तत्र 'चतुर्थी सम्प्रदाने' इति सूत्रेण सम्प्रदाने चतुर्थी न भवति। सम्प्रदाने कर्मणः उदाहरणं भवति— गुरुः शिष्यं (शिष्याय— सम्प्रदानम्) धर्मं ब्रुते शास्ति वा। अस्मिन् उदाहरणे 'अकथितञ्च' इति सूत्रेण सम्प्रदानस्य अविवक्षत्ववशात् अकथितम्, शिष्यम् इत्यस्य अप्रधानत्वात् गौणत्वात् वा द्वितीया विभक्तिः विधीयते। उदाहरणे 'धर्मं' इत्यस्य ईप्सिततमत्वात् मुख्यकर्मत्वात् तत्रापि विधीयते द्वितीया विभक्तिः। अत्र शिष्यम् इति पदे सम्प्रदानस्य अविवक्षा अस्ति। 'क्रुध् द्रुहेर्ष्यासूयार्थानां यं प्रति कोपः'[15] इति सूत्रेण क्रुध्, द्रुह चेत्यादि धातूनां योगे सम्प्रादनत्वम् प्रदर्शितम्। परन्तु 'क्रुध-द्रुहरुपसृष्टयोः कर्म'[16] इति सूत्रेण क्रुध्, द्रुह चेति धातुद्वयेन सह उपसर्गयोगात् तत्र सम्प्रदाने कर्मसंज्ञा भवति। यथा— क्रुरमतिक्रुध्यति, क्रुरमभिद्रुह्यति। उपसर्गभावात्तु अत्र सम्प्रदानत्वम्— क्रुराया क्रुध्यति द्रुह्यति वा।

अपादानकारके 'अपादाने पञ्चमी' इति सूत्रेण पञ्चमी विभक्तिः भवति। किन्तु यत्र अपादानस्य कर्मत्वविवक्षा भवति तत्र द्वितीया विभक्तिः भवति, न तु पञ्चमी। अपादानस्य अविवक्षायां 'अकथितञ्च' इति सूत्रेण गौणकर्मे द्वितीया विभक्तिः भवति। यथा— गोपः गां (गोः— अपादानम्) दुग्धं दोग्धि, वामनः वलिं (वलेः— अपादानम्) वसुधां याचते, वालिका वृक्षं (वृक्षात्– अपादानम्) पुष्पं चिनोति, शिष्यः गुरुं (गुरो– अपादानम्) धर्मं पृच्छति, राजा चौरं (चौरात्– अपादानम्) शतं दण्डति (गृह्णाति), देवदत्तः यज्ञदत्तं (यज्ञदत्तात्— अपादानम्) शतं जयति, देवगणः समुद्रं (समुद्रात्— अपादानम्) अमृतं मथ्नाति, चौरः देवदत्तं (देवदत्तात्— अपादानम्) शतं मुष्णाति। एतेषु उदाहरणेषु दुह्, याच् चेति द्विकर्मकधातूनां योगे गाम्, वलिम् चेत्यादि गौणकर्मेषु अपादानस्य अविवक्षत्ववशात् कर्मणि द्वितीया सञ्जाता।

गोपः गां गृहं (गृहे) नयति, गोपः गां व्रजं (व्रजे—अधिकरणम्) रुणद्धि, वालकः अजां ग्रामं (ग्रामे) हरति, भृत्यः ग्रामं (ग्रामे) भारं वहति, कृषीवलः भूमिं (भूमौ) शस्यं कर्षति। एतेषु उदाहरणेषु यथाक्रमेण गृहं, व्रजं, ग्रामं, भूमिम् इत्यादौ शब्देषु गौणकर्मेषु अधिकरणस्य अविक्षत्ववशात् 'अकथितञ्च' इति सूत्रेण विधीयते कर्मसंज्ञा। ततः अत्र 'कर्मणि द्वितीया' इति सूत्रेण विहिता द्वितीया विभक्तिः।

'अधि' इति उपसर्गयोगात् आधारस्य कर्मसंज्ञा विधीयते 'अधिशीङ्स्थासां कर्म'[17] इति सूत्रेण।

यथा— शिशुः शय्याम् अधिशेते, कृष्णः द्वारकाम् अधितिष्ठति, नृपः सिंहासनम् अध्यास्ते। एवं च आधारस्य कर्मसंज्ञा 'अभिनिविश्च'[18] इति सूत्रेणापि भवति। उदाहरणरूपेण प्राप्यते— साधुः सन्मार्गम् अभिनिविशते। अत्र अभि, नि चेति उपसर्गद्वयं सम्मिलितरूपेण विश्-धातोः पूर्वं प्रयुक्तेन विश्-धातोः आधारस्य कर्मसंज्ञा भवति। ततः उप, अनु, अधि, आङ् चेति उपसर्गयोगेन वस्-धातोः आधारस्य कर्मत्वविवक्षा वीक्ष्यते 'उपान्वध्याङ् वसः'[19] इति सूत्रेण। यथा- हरिः वैकुण्ठम् उपवसति, वालकः नगरम् अनुवसति, नृपः राजधानीम् अधिवसति, छात्रः गुरुकुलम् आवसति।

केवलम् अकर्मकः स्वप्-धातुयोगेन देशविशेषस्य नाम्नि अधिकरणस्य अविवक्षत्ववशात् कर्मसंज्ञा विधीयते 'अकर्मक धातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्' इति वार्तिकनियमेन। यथा— कुरुन् स्वपिति इति उदाहरणे निद्राविषये कुरुदेशः निद्राकर्तुः ईप्सिततमत्ववशात् कुरुन् इत्यस्य 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण कर्मत्वम् भवति, ततः द्वितीया विभक्तिः विधीयते 'कर्मणि द्वितीया' इति सूत्रेण।

**कर्तृकर्मादिकारकेषु करणत्वविवक्षायां तृतीया विभक्तिः**

कर्तरि वाच्ये कर्ता अभिहितत्ववशात् प्रातिपदिकार्थे प्रथमा विधीयते। परन्तु कर्मवाच्ये भाववाच्ये च कर्ता अनुक्तत्वात् तत्र तृतीया विभक्तिः विहिता 'कर्तृकरणयोस्तृतीया'[20] इति सूत्रेण। कर्तरि या तृतीया विहिता सा अनुक्ते कर्तरि तृतीया इति नाम्ना ज्ञायते। यथा— मया चन्द्रः द्रष्टव्यः दृश्यते वा। अत्र मया इत्यत्र अनुक्तत्वात् कर्तरि तृतीया सञ्जाता। 'साधकतमं करणम्'[21] इति सूत्रेण च प्रयोज्यकर्तरि करणत्वम्, ततः च तत्र 'कर्तृकरणयोस्तृतीया' इति सूत्रेण स्यात् तृतीया विभक्तिः। यथा प्रभुः भृत्येन कार्यं कारयति। 'भृत्येन' इति पदम् अत्र प्रयोज्यकर्ता। अत्र 'प्रभुः' इति पदं हेतुकर्ता प्रयोज्यकर्ता च इति वक्तुमुचितम्। अपि च सम्-पूर्वकात् ज्ञा-धतोः कर्म विकल्पेन तृतीया विभक्तिः स्यात् 'संज्ञोऽन्यतरस्यां कर्मणि'[22] इति सूत्रेण। अत्र उदाहरणरूपेण प्राप्यते- पित्रा(पितरं) संजानीते।

सामान्यतः 'साधकतमं करणम्'[23] इति सूत्रेण क्रियासिद्धौ प्रकृष्टोपकारकं कारकं प्राप्नोति करणसंज्ञा। यथा— चक्षुषा पश्यति, कर्णेन श्रृणोति, विमानेन गच्छति चेत्यादयः उदाहरणानि प्राप्यन्ते। चक्षुषा, कर्णेन, विमानेन च इत्यादिषु पदेषु 'साधकतमं करणम्' इति सूत्रेण करणत्वं विवक्षितम्, 'कर्तृकरणयोस्तृतीया' इति सूत्रेण तृतीया विहिता।

'अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया'— इति वार्तिकेन यत्र सम्प्रदाने चतुर्थी स्यात् तस्मिन् स्थले लक्ष्यते तृतीया विभक्तिः। यथा— दास्या संयच्छते कामुकः। अशिष्टव्यवहारेण कामुकः दानक्रिया सम्पन्नं करोति। अतः एतेन अत्र दास्या इति पदे या तृतीया विभक्तिः सा भवति सम्प्रदाने तृतीया।

अपादानकारके तृतीया विभक्तिः करणत्वं वा इति विषये पाणिनिशब्दशास्त्रसम्मतं किमपि नियमः सूत्रं वा न प्राप्यते। अपि च पाणिनिनियमस्य वहिर्भूतरूपण अपि किमपि प्रसिद्धकविप्रयोगोऽपि न दृश्यते।

अधिकरणे 'नक्षत्रे च लुपि'[24] इति सूत्रेण तृतीया सप्तमी च विभक्तयः भवन्ति। अर्थात् तृतीयां विना वैकल्पिकरूपेण सप्तमी अपि भवितुम् अर्हति। यथा— मूलेन (मूले) आवाहयेद् देवीं श्रवणेन (श्रवणे) विसर्जयेत्। अत्र मूलं श्रवणञ्चते शब्दद्वयं नक्षत्रवाचकं भवति।

**षड्विधकारकेषु सम्प्रदानविवक्षायां चतुर्थी विभक्तिः**

'चतुर्थी सम्प्रदाने' इति सूत्रेण सम्प्रदानकारके चतुर्थी विभक्तिः स्यात्। अपि च सम्प्रदानं विना अन्यस्मिन् कारके यदि सम्पदानस्य विवक्षा स्यात् तर्हि तत्र 'चतुर्थी सम्प्रदाने' इति सूत्रेण चतुर्थी विभक्तिः

भवति। सम्प्रदानत्वविवक्षितानि सूत्राणि अत्र क्रमेण अधः उपस्थाप्यन्ते—

'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता'[25] इति सूत्रेण पूर्ववर्ती प्रवर्तनारूपव्यापारस्य यः कर्ता तस्य सम्प्रदानसंज्ञा भवति। एतादृशं कारकं प्रवर्तनाकर्तरि सम्प्रदानकारकम् इति कथ्यते। यथा— राजा विप्राय गां प्रतिश्रृणोति आश्रृणोति वा। अत्र विप्र भवति पूर्वप्रवर्तनारूपव्यापारस्य कर्ता। अतः अत्र विप्र इति पदे सम्प्रदाने चतुर्थी विहिता।

कर्मणि चतुर्थी विषये पाणिनिना पृथक् पृथक् त्रीणि सूत्राणि विरच्यन्ते। तानि च—

1. 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः'[26] इति सूत्रेण तुमुन-प्रत्ययान्तक्रिया यदि उह्यः स्यात् तर्हि तत्र कर्मणि चतुर्थी स्यात्, न तु अत्र सम्प्रदानत्वम्। यथा— नृसिंहाय (नृसिंहमनुकूलयितुम्) नमस्कुर्मः, वालकः फलेभ्यः (फलानि आहर्तम्) उद्यानं याति।
2. 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु'[27] इति सूत्रेण अनादरसूचके दिवादिगणीयस्य मन्धातोः कर्मणि वैकल्पेन चतुर्थी विभक्तिः स्यात्। यथा— अहं त्वां तृणाय(तृणम्) न मन्ये।
3. 'गत्यर्थकर्मणि द्वितीया चतुर्थौ चेष्टायामनध्वनि'[28] इति सूत्रेण विकल्पेन गमनार्थकधातोः कर्मणि चतुर्थी स्यात्। उदाहरणं यथा— रामः ग्रामाय(ग्रामं) गच्छति।
4. 'परिक्रियणे सम्प्रदानमन्यतरस्याम्'[29] इति सूत्रेण वैकल्पेन करणकारकं सम्प्रदानसंज्ञा प्राप्नोति। यथा— भृत्यः शताय(शतेन) परिक्रीतः।

अपादाने चतुर्थी सम्प्रादानं वा इत्यस्य विषये पाणिनेः कोऽपि प्रसिद्धप्रयोगः कोऽपि नियमः वा न प्राप्यते।

गत्यर्थकधातोः कर्मणि आधारे द्वितीया चतुर्थी चेत्यादयः विभक्तयः भवन्ति, न तु सप्तमी विभक्तिः। यथा— रविः ग्रामाय (ग्रामं) गच्छति, ब्राह्मणः गृहायो (गृहं) गच्छति। अत्र ग्रामं गृहं चेति पदद्वयं युगपद्रूपेण कर्म अधिकरणश्चेति। तत्र 'गत्यर्थकर्मणि द्वितीयाचतुर्थौ.....' इति सूत्रेण द्वितीयां विना गमनार्थकधातोः कर्मणि विकल्पेन चतुर्थी अपि प्रयोक्तुं शक्यते।

**षड्कारकेषु अपादानत्वविवक्षायां पञ्चमी विभक्तिः**

'अपादाने पञ्चमी' इति सूत्रेण अपादानकारके पञ्चमी विभक्तिः भवति। अपादानं विना कर्म-करण-अधिकरणकारकेषु अपि विधीयते पञ्चमी विभक्तिः।

'ल्यब्लोपे कर्मण्यधिकरणे च' इति वार्तिकेन ल्यप्रत्ययान्तक्रिया यदि उह्यः स्यात् तर्हि तत्र कर्मणि पञ्चमी स्यात्। यथा— श्वशुरात् (श्वशुररं वीक्ष्य) जिह्रेति नवोढा वधूः। एवं च प्रस्तुतवार्तिकेन अधिकरणेऽपि पञ्चमी दृश्यते। यथा— आसनात् (आसने उपविश्य) प्रेक्षते राजा। अत्र उपविश्य इति ल्यप्-प्रत्ययान्तक्रियायाः उह्यत्वात् तस्याः अधिकरणे अर्थात् आसने सञ्जाता पञ्चमी विभक्तिः।

अपि च 'करणे च स्तोकाल्प-कृच्छ-कतिपयस्यासत्तवचनस्य'[30] इति सूत्रेण स्तोक-अल्प-कृच्छ-चेत्यादयः शब्दाः यदा विशेषरूपेण प्रयुज्यते, तदा एतत् शब्दानाम् उत्तरं विकल्पेन करणकारके तृतीया विभक्तिः पञ्चमी विभक्तिः च विहिता। यथा— स्तोकाद्(स्तोकेन) मुक्तः।

कर्तृसम्प्रदानयोश्च अपादानसंज्ञाविषये तत्र पञ्चमी विभक्तेः विषये किमपि प्रसिद्धकविप्रयोगः पाणिनिसूत्रं वा न प्राप्यते।

**षड्विधकारकेषु अधिकरणत्वविवक्षायां सप्तमी विभक्तिः**

'सप्तम्यधिकरणे च'[31] इति सूत्रेण सामान्यरूपेण अधिकरणकारके सप्तमी विभक्तिः भवति। परन्तु

अधिकरणं विना अन्यस्मिन् कारके अपि विधीयते अधिकरणत्वम्, तत्र च सप्तमी विभक्तेः प्रसक्तिः स्यात्। तानि स्थानानि अधः प्रस्तूयन्ते—

'यस्य च भावेन भावलक्षणम्', 'षष्ठी चानादरे' चेति सूत्रद्वयेन कर्तरि कर्मणि च विधीयते सप्तमी विभक्तिः। 'षष्ठी चानादरे' इति सूत्रेण अपि कर्मणि कर्तरि च विकल्पेन षष्ठी भवितुं शक्यते। भावे कर्तरि सप्तमी— ब्राह्मणेषु अधियानेषु विष्णुमित्रः गतः। भावे कर्मणि सप्तमी- गोषु दुह्यमानासु देवदत्तः गतः। अनादरे कर्तरि सप्तमी— रूदति (रूदतः) पुत्रे(पुत्रस्य) पिता प्राव्राजीत्। अनादरे कर्मणि सप्तमी— पश्यति (पश्यतः) मयि (मे) वालकः श्येनेन अपहृतः।

'अर्हाणां कर्तृत्वेऽनर्हानामर्तृत्वे तद्वैपरीत्ये च' इति वार्तिकसूत्रमपि कर्तरि सप्तमी विभक्तेः विधीनं क्रियते। यथा— सत्सु तिष्ठत्सु असन्तस्तरन्ति, असत्सु तरत्सु सन्तस्तिष्ठन्ति।

'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्' इति वार्तिकेन इन्प्रत्ययस्य विषयः यः क्त-प्रत्ययान्तः शब्दः, तस्य कर्मणि अनुक्तत्वात् सप्तमी स्यात्। यथा— अधीति व्याकरणे। वालमनोरमायां प्राप्यते— 'किम् अधीतवानिति कर्मविशेषजिज्ञासायां व्याकरणम् अध्ययने कर्मत्वेनान्वेति' इति।

करणे अधिकरणत्वविषये सप्तमी विभक्तेः विषये अपि किमपि उदाहरणं न प्राप्यते।

अधिकरणत्वविवक्षा अपि सम्प्रदाने दृश्यते। यथा— 'कौन्तेय मा प्रयच्छेश्वरे धनम्'। अत्र दानक्रियायाः कर्मणि (ईश्वरे) अधिकरणत्वं विवक्षा समर्थनीया प्रसिद्धकविगणस्य प्रयोगात्। एवं च 'अरौ कुपितः शान्तः सह्यशान्तो दुर्मनायते' इति प्रसिद्धप्रयोगेऽपि सम्प्रदानत्वं दरीदृश्यते।

'सप्तमी-पञ्चमौ कारकमध्ये' इति सूत्रेण विकल्पेन अपादाने सप्तमी भवति। यथा— इहस्थोऽयं क्रोशो क्रोशाद्वा लक्ष्यं विध्येत्।

**कर्त्रादिकाराकाणां मध्ये सम्वन्धविवक्षायां षष्ठी विभक्तिः**

अनादरे कर्तरि षष्ठी 'षष्ठी चानादरे' इति सूत्रेन स्यात्। कृत्यप्रत्यययोगेन अनुक्ते कर्तरि विकल्पेन तृतीयां विना षष्ठी अपि भवितुं शक्यते 'कृत्यानां कर्तरि वा'[32] इति सूत्रेण। यथा— मया मम वा सेव्यो हरिः। कृद्योगात् अनुक्ते कर्तरि अपि षष्ठी 'कर्तृकर्मणोः कृतिः'[33] इति सूत्रेण भवति। यथा— कृष्णस्य कृतिः, शिशोः शयनम्। 'अधिकरणवाचिनश्च'[34] इति सूत्रेण कर्तरि षष्ठी विभक्तिः विधीयते। यथा— अनुक्ते कर्तरि षष्ठी— इदमेषाम् आसितम् शयितं वा।

पाणिनिना कर्मणि कर्मकारके वा षष्ठीविभक्त्यर्थं चतुर्दशसूत्राणि उक्तानि। तानि च यथा— १. कृत्यानां कर्तरि वा, २. कर्तृकर्मणोः कृतिः, ३. उभय-प्राप्तौ कर्मणि, ४. क्तस्य च वर्तमाने, ५. अधीगर्थदयेशां कर्मणि, ६. कृञः प्रतियत्ने, ७.रूजार्थानां भाववचनानामज्वरे, ८. आशिषि नाथः, ९. जासिनिप्रहणनाटक्राथपियां हिंसायाम्, १०. व्यवहृपणोः समर्थयोः, ११. दिवस्तदर्थस्य, १२. विभाषोपसर्गे, १३. अधिकरणवाचिनश्च, १४. प्रेष्य-ब्रुवर्हविषो देवता सम्प्रदाने चेति।

ज्ञा-धातोः अविदर्थस्य करणे सम्वन्धमात्रविवक्षायां षष्ठी विभक्तिः भवति 'ज्ञोऽविदर्थस्य करणे' इति सूत्रेण। यथा— तैले सपिषः जानीते। शेषत्वेन न विवक्षिते— तैले सर्पिषा (घृतेन वा) प्रवर्तते। सहितार्थे तृप्त्यर्थे वा करणकारके शेषविवक्षायां षष्ठी स्यात् 'पूरण-गुण-सहितार्थ-सदव्यय-तव्य-समाधिकरणेन'[35] इति सूत्रेण। यथा— नाग्निस्तृप्यति काष्ठानाम्।

हितोपदेशे अपि प्राप्यते— 'अज्ञातकुलशीलस्य वासो देयो न कस्यचित्' इति। अत्र सम्प्रदाने सम्वन्धमात्रविवक्षायां षष्ठी विहिता। तथाहि उक्तं वैयाकरणसिद्धान्तकौमुदीकारेण— 'कर्मादीनामपि

सम्वन्धमात्रविवक्षया षष्ठ्येव' इति।

पाणिनेः अष्टाध्यायां अपादाने षष्ठीविभक्तेः विवक्षाविषये किमपि सूत्रं न प्राप्यते। यथा— तावद्भयस्य भेतव्यं यावद् भयमनागतम्। अत्र 'भीत्रार्थानां भयहेतुः' इति सूत्रेण भयात् इति उचितम्।

पाणिनिना एकेन सूत्रेन अधिकरणे षष्ठी विभक्तेः निर्देशः क्रियते। वारणार्थक-प्रत्ययान्त-शब्दयोगे कालाधिकरणे सम्वन्धमात्रविवक्षायां षष्ठी विभक्तिः भवति 'कृत्वोऽर्थप्रयोगे कालाधिकरणे'[36] इति सूत्रेण। यथा- अह्नः पञ्चकृत्वः भुङ्क्ते।

वस्तुतस्तु कारकं विभक्तिश्च न एव तुल्यम्। वाक्ये उपयोगकृतार्थस्य दृष्ट्या सुप्रविभक्तीनां संस्कृभाषायां त्रिधा प्रयोगः दृश्यते, यथा— कारकविभक्तिः, शब्दविभक्तिः, विशेषार्थविभक्तिश्चेति। सु- औजसादिविभक्तिभिः शब्दस्य स्वार्थम् अन्तरेण अन्तः अर्थान्तरमपि द्योतितः स्यात्। विभक्तेः एषः अन्तःस्थ-अर्थरेव पृथक् क्रियते कर्तारं कर्म-करण-सम्प्रदानादिभ्यः। तेन षड्कारकेषु निर्दिष्टविभक्तिं विना अन्यानां विभक्तीनां प्रयुक्तैः कारकत्वं न ध्वंस्यते। एतादृशं प्रयोगं कर्तरि सम्प्रदानत्वं, करणे कर्मत्वं, सम्प्दानत्वं वा चेत्यादि संज्ञया अभिधीयते। एवं च यत्र कारकत्वं न अस्ति तत्र कर्मणि तृतीया, कर्तरि षष्ठी, करणे च षष्ठी विहिता।

## Endnotes

1. प्रौढमनोरमा
2. प्रातिपदिकार्थ-लिङ्ग-परिमाण-वचनमात्रे प्रथमा- २/३/४६
3. कर्मणि द्वितीया- २/३/२
4. कर्तृकरणयोस्तृतीया- २/३/१८
5. चतुर्थी सम्प्रदाने – २/३/१३
6. अपादाने पञ्चमी- २/३/२८
7. सप्तम्यधिकरणे च- २/३/३६
8. आह्निकम्-३ पा.सू.-१/४/२३
9. अ.सू.सं.-२/३/१
10. अ.सू.सं.-२/३/१८
11. अ.सू.सं.-२/४/४२
12. अ.सू.सं.-२/३/२८
13. अ.सू.सं.-१/४/२५
14. अ.सू.सं.-२/३/३६
15. अ.सू.सं.-१/४/३७
16. अ.सू.सं.-१/४/३८
17. अ.सू.सं.-१/४/४६
18. अ.सू.सं.-१/४/४७
19. अ.सू.सं.-१/४/४८
20. अ.सू.सं.-२/३/१८
21. अ.सू.सं.-१/४/४२
22. अ.सू.सं.-२/३/२२
23. अ.सू.सं.-१/४/४२
24. अ.सू.सं.-२/३/३५
25. अ.सू.सं.-१/४/४०
26. अ.सू.सं.-२/३/१४
27. अ.सू.सं.-२/३/१७
28. अ.सू.सं.-२/३/१२
29. अ.सू.सं.-१/४/४४
30. अ.सू.सं.-२/३/३३
31. अ.सू.सं.-२/३/३६
32. अ.सू.सं.-२/३/७१
33. अ.सू.सं.-२/३/६५
34. अ.सू.सं.-२/३/६८
35. अ.सू.सं.-२/२/११
36. अ.सू.सं.-२/३/६४

## Bibliography


- पस्पशाह्निकम्- टीकाकारः सम्पादश्च शशिभूषणमिश्रः, वि.एन.पाब्लिकेशन्, कोलकाता, प्रथमप्रकाश- 2018.
- अष्टाध्यायोसूत्रपाठः, सत्यनारायण चक्रवर्ती, संस्कृत पुस्तक भाण्डार,कोलकाता, 12 वैशाख, 2012.
- वाक्यपदीयम्, पण्डित श्री रघुनाथ शर्मा, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, 1997.
- काशिका- वामनजयादित्य, तारा प्रिण्टस् वुक्स,1985.
- शब्दकौस्तुभः, भट्टोजि दीक्षित(1-3भाग), चौखम्वा संस्कृत सीरिज आँफिस्, वाराणसी, 1991.
- वैयाकरणसिद्धान्तकौमुदी- भट्टोजीदीक्षितः, मोतीलाल बनारसीदास, 2010.


---